तेन, न वैगुण्यम् । एवं प्रयत्नक्रमस्य गुणभावो यत्र, तत्र अर्थेन स एवाश्रयितव्यः। यथा "जाते वरं ददाति, जातमञ्जलिना गृह्णाति जातमभिप्राणिति"-इति अर्थात् पूर्वमभिप्राणितव्यम् ततः अञ्जलिना गृहीतव्यः, ततो वरो देयः,-इति, तथा विमोकः पूर्वमाम्नातः, पश्चात्तद्योगः, अर्थात् विपरीतः कार्यः । याज्यानुवाक्ये तु विपर्ययेण आम्नाते, विपर्ययेण कर्त्तव्ये, न अत्र पाठक्रमोऽभीयते, यतो देवतोपलक्षणार्थाऽनुवाक्या, प्रदानार्था याज्या, "अग्निहोत्रम् जुहोति"-इति पूर्वमाम्नातम्, "ओदनं पचति"-इति पश्चात्, असम्भवात् पूर्वमोदनःपक्तव्यः । प्रैषप्रैषार्थौ तु विपर्ययेण आम्नातौ, तौ च विपर्य्ययेण कर्त्तव्यौ" भाष्यम्

"अनियमोऽन्यत्र" ३ सू०

अन्यस्मिन् विषये क्रमस्य नियमो नास्ति, यथा दर्शपूर्णमासयोर्याजमानानां प्रयाजानुमन्त्रणादीनाम् नानाशाखान्तरसमाम्नातानाम् "वसन्तमृतूनाम् प्रीणामि"-इत्येवमादीनाम्, 'एको मम,-इत्येवमादीनाञ्च" भा०

"क्रमेण वा नियामकता क्रत्वेकत्वे तद्गुणत्वात्" ४ सू०

"दर्शपुर्णमासयोराम्नातम्'-'समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजति"-इति । तत्र संशयः-किम् अनियतेनैव क्रमेण एषाम् अनुष्ठानम् ? उत यः पाठक्रमः स एव नियम्येत ?-इति । किंप्राप्तम्?-नियमकारिणः शास्त्रस्याभावात् अनियमः-इति । एवं प्राप्ते ब्रूमः-क्रमेण, एव नियम्येत एकस्मिन् क्रतौ-इति । कुतः? । तद्गुणत्वात्, तद्गुणत्वं हि गम्यते पदार्थानाम्, यथा, स्नायात् अनुलिम्पेत्, भुञ्जीत-इति च क्रमेण अनुष्ठानम् अवगम्यते, वाक्यात् पदार्थानाम्, यथा चाहृष्टार्थेषु उपदिश्यमानेषु, कश्चित् ब्रूयात्,-'देवाय धूपो देयः पुष्पाण्यवकरितव्यानि चन्दनेनानुलेप्तव्यः उपहारोऽस्मै उपहर्त्तव्यः" एवं कृते देवस्तुष्यति,-इति, तमन्यः प्रतिब्रूते, नैतदेवं, न प्रथमं धूपो दातव्यः, प्रथमं पुष्पाणि अवकरितव्यानि-इति, एवं मन्यते-धूपदानस्य प्राधम्यम् अनेन उक्तम्-इति । तस्मात् वाचनिक एषाम् एष क्रमः-इति" भा०

"अशाब्द इति चेत्, स्याद्वाक्यशब्दत्वात् । ५ सू०

इति चेत्, पश्यसि, "अथैवं गम्यमाने अशाब्दः एव क्रमः । कथं ? पदार्थपूर्वको वाक्यार्थः पदेभ्यश्च पदार्था एव अवगम्यन्ते न क्रमः । स्यात् एतदेवं, यदि पदार्थानाम् समूहस्य श्रवणं प्रत्यायकम् अर्थस्य स्यात्, न तु समुदायः प्रत्यायकः,-इत्युक्तं "तद्भूतानां क्रियार्थेन समाम्नायः" (१।१।२५ अ०)-इत्यत्र । तस्मात् क्रमस्य वाचकशब्दाभावात् व्यामोह एष क्रमोऽवगम्यते । एवं चापूर्वासक्तिरनुग्रहीष्यते, इतरथा सापि विप्रकृष्येत घटीयन्त्र इव । दर्शयिष्यति च,-"हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः, अथ वक्षसः,-इति । यदि नियामकः पाठक्रमः ततो न विधातव्यमेतत्, नियामके हि पाठक्रमे पाठक्रमात् एव प्राप्नुयात्" भा०

"अर्थकृते वानुमानं स्यात्, क्रत्वेकत्वे परार्थत्वात् स्वेन त्वर्थेन सम्बन्धः, तस्मात्स्वशब्दमुच्यते" ६ सू०

"एकस्मिन् क्रतावेकत्वात् क्रतुः, अनेकस्मिन् पदार्थेऽर्थकृतत्वात् क्रमस्य, तत्र एष एव क्रमो नियम्येतानुमानेन । कुतः ? परार्थत्वात् वेदस्य, परार्थो हि वेदो यद्यत् अनेन शक्यते कर्त्तुम्, तस्मै-तस्मै प्रयोजनाय एष समाम्नायते, शक्यते च अनेन पदार्थो विधातुम्, शक्यते च क्रियाकाले प्रतिपत्तुम् । तस्मात् वेदः पदार्थांश्च विधातुम् उपादेयः, क्रियाकाले च प्रतिपत्तुम्, न शक्यते विशेषः-विधातुमयं समाम्नायते, न प्रतिपत्तुम्-इति, अवक्ष्यमाणे विशेषे उभयार्थम् उपादीयते-इति गम्यते । प्रतिपत्तुं च अनेन क्रमेण शक्यते, नान्येन, अत एव च कृत्वा पाठक्रमापचारे, विनष्ट-इत्युच्यते, इतरथा हि यत् यस्य प्रयोजनं, तस्मिन् निर्वर्त्यमाने एव किं नष्टं स्यात्, अदृष्टं कल्प्येत, तच्च अन्याय्यं दृष्टे सति । तस्मात् स्वशब्दः क्रमः-य एव पदार्थानां वाचकः शब्दः स एव क्रमस्यापि" भा०

"तथा चान्यार्थदर्शनम्" ७सू०

"एवं च अन्यार्थं दर्शयति,-'व्यत्यस्तमृतव्या उपदधाति"। "व्यत्यस्तं षोड़शिनं शंसति"। "आश्विनो दशमो गृह्यते तं तृतीयं जुहोति"-इति, यदि अनियमेन उपधानं शंसनं च, व्यत्यस्तवचनम् अनर्थकं स्यात्, न हि कथञ्चित् अव्यत्यासः-इति। तथा आश्विनस्य तृतीयस्य होमानुवादो न अवकल्पेत, यदि पाठक्रमेण नियमः-इति । तथा-'अभिचरता प्रतिलोमं होतव्यम्" प्राणानेव अस्य प्रतीचः प्रतियौति"-इति क्वचित् प्रतिलोमं विदधदनुलोमं दर्शयति, तदुपपद्यते, यदि पाठक्रमेण प्रयोगः, इतरथा, सर्व्वमनुलोमं स्यात् प्रतिलोमदर्शनं नोपपद्येत ! तथा 'चतुर्थोत्तमयोः प्रतिसमानयति"-इति, उक्ते सति,